श्री महालक्ष्मी ललिता स्तोत्रं

॥ध्यानं ॥

चक्राकारं महत्तेजः तन्मध्ये परमेश्वरी ।
जगन्माता जीवदात्री नारायणी परमेश्वरी ॥1॥

व्यूहतेजोमयी ब्रह्मानंदिनी हरिसुंदरी ।
पाशांकुशेक्षुकोदंड पद्ममालालसत्करा ॥2॥

दृष्ट्वा तां मुमुहुर्देवाः प्रणेमुर्विगतज्वराः ।
तुष्टुवुः श्रीमहालक्ष्मीं ललितां वैष्णवीं परां ॥3॥

॥श्रीदेवाः ऊचुः ॥

जय लक्ष्मि जगन्मातः जय लक्ष्मि परात्परे ।
जय कल्याणनिलये जय सर्वकलात्मिके ॥1॥

जय ब्राह्मि महालक्ष्मि ब्रह्मात्मिके परात्मिके ।
जय नारायणि शांते जय श्रीललिते रमे ॥2॥

जय श्रीविजये देवीश्वरि श्रीदे जयर्द्धिदे ।
नमः सहस्र शीर्षायै सहस्रानन लोचने ॥3॥

नमः सहस्रहस्ताब्जपादपंकजशोभिते ।
अणोरणुतरे लक्ष्मि महतोऽपि महीयसि ॥4॥

अतलं ते स्मृतौ पादौ वितलं जानुनी तव ।
रसातलं कटिस्ते च कुक्षिस्ते पृथिवी मता ॥5॥

हृदयं भुवः स्वस्तेऽस्तु मुखं सत्यं शिरो मतं ।
दृशश्चंद्रार्कदहना दिशः कर्णा भुजः सुराः ॥6॥

मरुतस्तु तवोच्छ्वासा वाचस्ते श्रुतयो मताः ।
क्रिडा ते लोकरचना सखा ते परमेश्वरः ॥7॥

आहारस्ते सदानंदो वासस्ते हृदयो हरेः ।
दृश्यादृश्यस्वरूपाणि रूपाणि भुवनानि ते ॥8॥

शिरोरुहा घनास्ते वै तारकाः कुसुमानि ते ।
धर्माद्या बाहवस्ते च कालाद्या हेतयस्तव ॥9॥

यमाश्च नियमाश्चापि करपादनखास्तव ।
स्तनौ स्वाहास्वधाकारौ सर्वजीवनदुग्धदौ ॥10॥

प्राणायामस्तव श्वासो रसना ते सरस्वती ।
महीरुहास्तेऽङ्गरुहाः प्रभातं वसनं तव ॥11॥

आदौ दया धर्मपत्नी ससर्ज निखिलाः प्रजाः ।
हृत्स्था त्वं व्यापिनी लक्ष्मीः मोहिनी त्वं तथा परा ॥12॥

इदानीं दृश्यसे ब्राह्मी नारायणी प्रियशंकरी ।
नमस्तस्यै महालक्ष्म्यै गजमुख्यै नमो नमः ॥13॥

सर्वशक्त्यै सर्वधात्र्यै महालक्ष्म्यै नमो नमः ।
या ससर्ज विराजं च ततोऽजं विष्णुमीश्वरं ॥14॥

रुदं तथा सुराग्रयाँश्च तस्यै लक्ष्म्यै नमो नमः ।
त्रिगुणायै निर्गुणायै हरिण्यै ते नमो नमः ॥15॥

यंत्रतंत्रात्मिकायै ते जगन्मात्रे नमो नमः ।
वाग्विभूत्यै गुरुतन्व्यै महालक्ष्म्यै नमो नमः ॥16॥

कंभरायै सर्वविद्याभरायै ते नमो नमः ।
जयाललितापांचाली रमातन्वै नमो नमः ॥17॥

पद्मावतीरमाहंसी सुगुणाऽऽज्ञाश्रियै नमः ।
नमः स्तुता प्रसनैवंछंदयामास सव्दरैः ॥18॥

॥फलश्रुतिः ॥

श्रीलक्ष्मी उवाच ।

स्तावका मे भविश्यंति श्रीयशोधर्मसंभृताः ।

विद्याविनयसंपन्ना निरोगा दीर्घजीविनः ॥1॥

पुत्रमित्रकलत्राढ्या भविष्यंति सुसंपदः ।

पठनाच्छ्रवणादस्य शत्रुभीतिर्विनश्यति ॥2॥

राजभीतिः कदनानि विनश्यंति न संशयः ।

भुक्तिं मुक्तिं भाग्यवृद्धिमुत्तमां च लभेन्नरः ॥3॥

॥ श्रीलक्ष्मीनारायणसंहितायां देवसंघकृता श्रीमहालक्ष्मीललितास्तोत्रं ॥